स्य

श्रीगणाधिपतयेनमः॥ जलत्वजातौप्रमाणमाह स्नेहेति कारणतावच्छेदकतया धर्मसिद्धौबाधकाभावात्तस्यजातित्वमिति भावः॥ नित्यवृत्तिधर्मस्यका
र्यतावच्छेदकत्वाभावेन स्नेहत्वंकार्यतावच्छेदकत्वन्नसंभवतीतिशंकते यद्यपीति तथाकार्यतावच्छेदकं वस्तुतस्तु नित्यसाधारणधर्मस्यकार्यतावच्छे
दकत्वेदोषाभावात् जन्यपदन्नदेयमेव ननुयथारण्यस्थदंडादौफलानुपधायककारणतावच्छेदकतयादण्डत्वादिजातिस्तथात्रापिभविष्य

जलन्निरूपयति वर्णःशुक्लोरसस्पर्शौजलेमधुरशीतलौ स्नेहसमवायिकारणतावच्छेदकतयाजलजातिसि त्व
द्धिः॥ यद्यपिस्नेहत्वंनित्यानित्यवृत्तितयानकार्यतावच्छेदकंतथापिजन्यस्नेहत्वंतथाबोध्यं॥ अथपरमाणौ
जलत्वन्नस्यात् तत्रजन्यस्नेहाभावात् तस्यचनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावनियमादितिचेन्न॥

यतआह तस्येति दंडादेस्स्वरूपयोग्यतायांनकापिक्षतिः॥ तस्यानित्यत्वेन फलोपधायकत्वाभावादितिभावः॥ जन्यजलत्वजातेःज
न्यजलमात्रवृत्तिजातेः तदवच्छिन्नेति जन्यजलत्वावच्छिन्नेत्यर्थः॥ नचैवंजलान्त्यावयविनिजलत्वन्नस्यादितिवाच्यं॥ जलस्यान्त्याव
यवित्वानुपगमात्॥ ननुजलत्वावच्छिन्नंप्रतिसमवायसंबंधेनस्नेहवतःकारणत्वमस्तु अतिरिक्तजातिकल्पनापेक्षयालाघवा

मु॰दि॰ दिति चेन्न जलत्वावच्छिन्नं प्रति स्नेहत्वेन कारणत्वं शीतस्पर्शत्वेन वेत्यत्र विनिगमनाविरहेणातिरिक्तजातिसिद्धेः क्लृप्तमादाय कल्पनीयेन विनि
गमनाविरहाभावादिति केचित्तु धूमादिकं प्रत्यार्द्रेन्धनादेः कारणत्वं निर्विवादम् आर्द्रत्वं च जलसंयुक्तत्वम् तथा च जलसंयुक्तेन्धनत्वेनेन्धनसं
युक्तजलत्वेन वा कारणतेत्यत्र विनिगमनाविरहाज्जलत्वेन्धनत्वयोः पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिरित्याहुः। परे तु स्थूल
जलवृत्तिप्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारणजलत्वजातिसिद्धिः कार्यतावच्छेदककारणतावच्छे

जन्यस्नेहजनकतावच्छेदिकाया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धिः

शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति ननु शुक्लरूपवत्त्वं लक्षणं अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्ति

द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ॥ ९ ॥

दकयोरैक्ये क्षत्यभावान्नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाच्चेत्याहुः ननु इति पृथिव्यादावतिव्याप्तेरिति शेषः शुक्लरूपवत्त्वस्य लक्षणत्वे
पि न क्षतिरित्यभिप्रेत्याहुः अथवेति द्रव्यत्वव्याप्यवायुत्वजातिमादाय वायावतिव्याप्तिवारणाय रूपवद्वृत्तीति यथा च वायुत्वजातिस्तथाग्रे वक्ष्यते पृथि
वीत्वादिजातिमादाय पृथिव्यादावतिप्रसंगवारणाय नैमित्तिकद्रवत्ववदवृत्तीति साक्षादिति पदं सत्त्वादिवारणाय ॥ ९ ॥

द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्यव्याप्यत्वमात्रं न तु द्रव्यत्वव्याप्यत्वस्यापि तत्रान्तर्भावः रूपवद्वृत्तित्वविशेषणेनैव रूपत्वादीनां वारणात्तन्नि
वेशप्रयोजनाभावात् यद्यप्यवश्योपस्थितिकद्रव्यत्वस्यैव रूपस्थाने प्रवेशो युक्तस्तेनापि वायुत्वादेर्वारणात् एवं च द्रव्यत्ववद्वृत्तित्वाभावादेव प
टत्वादीनां वारणसंभवे द्रव्यत्वसाक्षाद्व्याप्येत्यपि न देयमिति लाघवम् तथापि मूले शुक्लो वर्ण इत्यादिना रूपघटितलक्षणस्योक्तत्वात्तद्घ
टितलक्षणपरिष्कारे मूलविरोधः स्यादिति तथानुक्तमिति ध्येयम् मूर्तत्वजात्यनभ्युपगमेन चेदं तेन जलत्वस्य द्रव्यत्वव्याप्य

अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः तेन स्फटिकादौ नातिव्याप्तिः

मूर्तत्वव्याप्यत्वेऽपि न क्षतिः जलघटान्यतरत्वमादाय घटादावतिव्याप्तिवारणाय जातीति क्वचिच्छुक्लरूपवद्वृत्तीति पाठः तत्र शुक्लपदं रूपपदं
वा संपातायातं एवमेव च व्यावृत्तिरभास्वरशुक्लेतरा इति रूपेत्यत्र रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपदयोर्बोध्या पृथिवीत्वमादाय पृथिव्यामति
व्याप्तिवारणायाभास्वरशुक्लेतररूपासमानाधिकरणेति जलत्वस्य शुक्लरूपसामानाधिकरण्यादसंभव इति शुक्लेतरेति तेजस्त्वमादाय ते
जस्यतिव्याप्तिवारणायाभास्वरेति – छ॥

शीतएवेति यद्यपि शीतं गुण इति कोशात् क्लीबत्वेनैवोचितं तथापि विशेष्यस्य स्पर्शशब्दस्य पुल्लिंगत्वात् पुल्लिंगतया निर्देशः शुक्लं रूपमित्यादौ शुक्लपदस्य क्लीबतयैवेति द्रव्यत्वव्याप्याया पृथिवीत्वरूपा जातिः तामादाय पृथिव्यामतिव्याप्तिवारणाय तिक्तावृत्तीति तेजस्त्वादिजातिमादाय तेजआदावतिव्याप्तिवारणाय मधुरवद्वृत्तीति शेषं दर्शितदिशावसेयम् शीततरेति द्रव्यत्वरूपजातिमादायातिव्याप्ति

रसस्पर्शाविति जलस्य मधुर एव रसः शीत एव स्पर्शः तिक्तरसवदवृत्ति मधुरवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं तेन शर्करादौ नातिव्याप्तिः शीतेतरस्पर्शावदवृत्ति स्पर्शवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं तदर्थः ननु शुक्लरूपमेवेति कुतः कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् जले नीलरूपासंभवात् कालिंदीजले नीलत्वप्रतीतिस्त्वाश्रयोपाधिकी॥ ॥ ॥ ॥ ॥

वारणाय शीतेतरस्पर्शवदवृत्तीति आत्मत्वादिकमादाय आत्मादावतिव्याप्तिवारणाय स्पर्शवद्वृत्तीति शेषं पूर्ववत् ननु जले नीलरूपाभावे कथं नीलरूपप्रतीतिरत आह कालिंदीति स्वसमवायिसंयोगसंबंधेनोपष्टंभकपार्थिवभागगतनीलरूपप्रतीतिः कालिंदीजलादाविति भावः अत एवेति उपदर्शितसंबंधस्य जलं नीलमिति प्रतीतिनियामकत्वादेवेत्यर्थः ॥ ॥ ॥

वियतीति तद्दीपदर्शितसंबंधघटकसंयोगनाशादिति भावः तत्र जले तस्य माधुर्यस्य अन्यथा आश्रयोपाधिकत्वाभावे व्यंजकत्वादि
त्युत्तरं हरीतकीभक्षणोत्तरं प्रत्यक्षेण माधुर्योपलंभादिति पूरणीयम् कल्पनागौरवादिति अवयवरसाजन्यस्य पृथिवीरसस्याग्निसंयोग
साध्यत्वदर्शनात् तदनुरोधमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वीकारे तिरिक्तकार्यकारणभावस्य हरीतक्यां मधुररसस्य
चकल्पने गौरवादिति भावः नन्वस्तु जले मधुरो रसस्तथापि जंबीरजलादौ प्रत्यक्षसिद्धस्याम्लरसस्यापि स्वीकारे बाधकाभाव इत्यत

अत एव वियति विक्षेपे धवलिमोपलब्धिः अथ जले माधुर्ये किं मानं नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते न च नारिकेलजलादौ
माधुर्यमुपलभ्यत एवेति वाच्यम् – तस्याश्रयोपाधिकत्वात् अन्यथा जंबीरकरवीरजलादावम्लादिरसोपलब्धेरम्लादिम
त्त्वमपि स्यादिति चेन्न – हरीतक्यादिभक्षणस्य जलरसव्यंजकत्वात् – न च हरीतक्यामेव जलोष्मसंयोगाद्रसांतरोत्पत्तिरिति वाच्यम्
कल्पनागौरवात् – पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकम् ॥३९॥ ४०॥ ४१॥ ४२॥

आह पृथिवीत्वस्येति – अम्लादिजनकतावच्छेदकत्वादिति यद्यपि पृथिवीत्वस्याम्लादेर्जनकतावच्छेदकतावन्मधुरजनकतावच्छेदकत्वम
प्यस्तीति तुल्यं तथापि हरीतक्यादिभक्षणोत्तरं जलेऽपि मधुरोपलब्धेस्तत्र मधुरस्वीकारस्यावश्यकत्वात् जलत्वेनापि मधुरं प्रति हेतुत्वं कल्प्यत इ

मु॰दि॰ ननुजंबीरसलिलादावाम्लप्रत्यक्षाज्जलत्वेनाम्लादिरसेपितुल्यवद्धेतुत्वंस्यादतआह- जंबीररसादाविति- स्वसमवायिसंयोगेनजंबीरगताम्लरसप्रतीतौस्तद्ग
तजल- इत्यर्थःशुष्केपिजंबीरे आम्लप्रतीतेस्तत्राम्लरसस्यावश्यकत्वेतस्यैवतद्गतजलेपरंपरयाप्रतीतेः हरीतक्यांतुमधुररसाभावान्नहरीतकीगतमाधुर्यस्य
जलेप्रतीतिरितिभावः कर्कटीभक्षणोत्तरंजलपानेतिक्तरसस्यानुभवात्तिक्तरसोपिजलेस्यादितितु नजलपानात्पूर्वमपिकर्कट्यांतिक्तरसोपलब्धेः कर्कटीभ
क्षणोत्तरंरसनाग्रवर्त्तिपित्तक्षोभेतदीयतिक्तोपलब्धेर्वैद्यकसिद्धत्वाच्च वस्तुतोनिदाघपीतनिर्मलगंगाजलमाधुर्यस्यानुभवसिद्धस्यापलापासंभवान्मधुरएवे

जंबीररसादौत्वाश्रयौपाधिकीनथाप्रतीतिः ॥

तियुक्तम्- एतेनहरीतक्यादौनजलसंयोगेनमाधुर्यमुत्पद्यतेयेनकल्पनागौरवात् परंतुहरीतक्यांकषायवन्मधुररसोपिस्वीक्रियतेतद्व्यंजकश्चजलसंयोगो
ननुनद्रुतरसांतरस्यफलबलात् ॥ यदिचचित्ररूपवच्चित्ररसेमानाभावात् गुणविरोधेननीरसेवहरीतकीरसप्रतीतिस्तु अवयवेषुरसत्वात्परंपरयेत्युच्यते- तदा २
तुजलसंयोगोहरीतक्यवयवगतमाधुर्यस्यैवव्यंजकइत्यपास्तम्- जलत्वजातावनुमानांतरंप्रमाणमाहेदेहेति पूर्वंशीतएवस्पर्शइत्युक्तंतत्साधयति- तेजस्संयो
गादिति- तत्रजलेविवेचयिष्यतेचपाकासंभवमुपरिष्टात् घृतादावित्यादिपदेनतैलपरिग्रहः- जलस्यैवस्नेहइत्युक्त्यनंतरंस्वाश्रयसंयोगेनप्रतीयतइतिशेषः ॥

एवमिति- ननुजलत्वाभावेपिघृष्टचंदनादौशैत्योत्पत्तेर्व्यभिचारेणकथंजन्यजलत्वेनतत्रहेतुत्वमतआह

तेनघृतादौसमवायेनस्नेहनिरासेन - जलएवेति - स्नेहस्यावांतरविशेषाभावात्तनोक्तीर्त्तिः तदवच्छिंनजनकतावच्छेदकं - सांसिधिकद्रवत्वत्वावच्छिंनजनक
कतावच्छेदकं तदेवजंन्यजलत्वमेवतदवच्छिंनजनकतावच्छेदकंजलत्वमितिभावः ६ अथैवंरीत्यापरमाणुद्यारत्तम् द्व्यणुकेजलत्वमेकंपरमाणुसाधारणं
द्वितीयमितिजलत्वयोर्भेदाग्रहः कुतइतिचेत्समनियतयोर्व्यक्तिरित्वादिति एवमग्रेपितैलादावित्यादिपदेनक्षीरपरिग्रहोनतुघृतस्यतत्रनैमित्तिकद्र

एवंजंन्यशीतस्पर्शजनकतावच्छेदकं जंन्य० जलत्वंतदवच्छिंनजनकतावच्छेदकंजलत्वंबोध्यम् - घृष्टचंदनादौतुशैत्योप
लब्धिश्चंदनांतर्वर्त्तिशीततरसलिलस्यैवतेजःसंयोगाज्जलेतुष्णप्रतीतिरौपाधिकीस्फुटैव - तत्रपाकासंभवात् स्नेहस्तत्र
द्रवत्वंतुसांसिधिकमुदाहृतं घृतादावपितदंतर्वर्त्तिजलस्यैवस्नेहः स्व जलस्यस्नेहसमवायिकारणत्वात्तेनजलएवस्नेह
प्रत्यक्षसिद्धः ७ इतिमंतव्यम् द्रवत्वंतुद्रव० सांसिधिकमुदाहृतंसांसिधिकद्रवत्वत्वंजातिविशेषः तदवच्छिंनजनकतावच्छेदकमपितदेवेतिभावः ८
इति

वत्वंस्यसमवायिनैवसत्वात् द्रवत्वमित्यनंतरंस्वाश्रयसंयोगेनप्रतीयतेशेषः ननुतैलेजलसत्वेतैलस्यदहनानुकूल्यंनस्यात् जलस्यदहनप्रतिकूलत्वादित्यत
आहस्नेहप्रकर्षेणेति प्रकृष्टस्नेहस्यदहनानुकूल्यमेवअपकृष्टस्यैवतस्यदहनप्रतिकूलत्वादितिभावः इतिवक्ष्यतीतिस्नेहनिरूपणावसरेइतिशेषः ७

प्रथमवदिति षष्ठीसमर्थाद्वा तिरिति अभिप्रायेणाह पृथिव्याइवेत्यर्थइति जलीयंशरीरमितितच्चपार्थिवावयवैरुपष्टब्धंबोध्यंमृतेनजलमात्रेहस्तपा
दादिव्यवस्थायामसंभवेपिनक्षतिः ननुतादृशशरीरमानाभावेऽनुपलंभादित्यतआह वरुणलोकइति तत्रचश्रुतिरेवप्रमाणमितिभावः गंधेतिरसव्यं
जकेमनसिव्यभिचारवारणायगंधाव्यंजकत्वइति कासारःसरः करकादिरित्यत्रादिपदात्कूपादिपरिग्रहः कठिनत्वादिति कठिनस्पर्शवत्वादित्यर्थः विली
नस्यतस्येतिसंबंध्यर्थेषष्ठी क्वचिद्विलीनयोरितिपाठः सतुन्न्ज्जुरेव विलीनतायाद्रवत्वरूपायाजलत्वव्यंजकत्वादितिभावः ननुविलीनतानैमित्तिकद्रवत्वमेव

तैलादावपिजलस्यैवद्रवत्वंम् स्नेहप्रकर्षेणचदहनानुकूल्यमितिवक्ष्यति नित्यतादिः प्रथमवत्किंतुदेहमयोनिजंम् पृथिव्या
इवेत्यर्थः तथाहि जलंद्विविधंनित्यमनित्यंचपरमाणुरूपंनित्यंम्द्व्यणुकादिसर्वमनित्यमवयवसमवेतंचाऽनित्यमपित्रिविधंशरी
रेंद्रियविषयभेदात्पृथिवीतोयोविशेषस्तमाह किंत्विति देहमयोनिजं अयोनिजमेवेत्यर्थः जलीयंशरीरमयोनिजंवरुणलोकेप्रसिद्धं
इंद्रियंरसनंसिंधुहिमादिर्विषयोमतः इंद्रियमिति जलीयमित्यर्थः तथाहि रसनंजलीयंगंधाव्यंजकत्वेसतिरसव्यंजकत्वात् सक्तु

तदुक्तमूषणेपितच्चतच्चनजलत्वव्यंजकं यदिचविलीनेतस्मिन्नित्यस्यतस्मिन्नष्टेसतीत्यर्थस्तथापि करकादिनाशोत्तरद्रव्यांतरोत्पादात्तत्रैवद्रवत्वजलत्वयोः
प्रत्यक्षं नकरकायांनष्टत्वादतआह यद्द्व्यमिति तथाचकरकादिनाशोत्पन्नद्रव्यांतरेजलत्वस्यप्रत्यक्षसिद्धत्वादुक्तव्याख्याकरकादिषुजलत्वसिद्धिरितिभा
वः

हेऽनेकव्यक्तिग्रहहेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण सुखदुःखादिसमवायिकारणतावच्छेकतया तत्सिधिः
प्रदर्शिता अथ सुखत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन कारणत्वे मानाभावः सुखदुःखद्वेषभावनाधर्माधर्मान् प्रतियथाक्रमं धर्माधर्मी निष्ठसाधनत्वा
दि ज्ञानानुभवविहितनिषिद्धकर्मणां समवायसंबंधेन निमित्तकारणत्वावश्यकतयाऽतिप्रसंगाभावाद्भावकार्याणां समवायिकारणकत्वनियम
स्य तु द्रव्यत्वेन तत्तद्व्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेन वा समवायिकारणत्वमादायैवोपपन्नत्वादिति चेदत्र प्राञ्चः कार्यमात्रवृत्तिजातेः समवायिका

ऽआत्मेन्द्रियाद्यधिष्ठातेति आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति ॥ ॥ ॥ ॥ ॥ ॥

रणकार्यतावच्छेदकत्वनियमेन तादृशकार्यकारणभावस्यावश्यकत्वात् न च तावता सुखत्वाद्यवच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वमस्तु अदृष्टा
देर्निमित्तकारणत्वादेवातिप्रसंगविरहादिति वाच्यम् व्याप्यलघुभूतधर्मे कारणतावच्छेदके संभवति व्यापकधर्मेण कारणत्वकल्पनाया अन्याय्य
त्वादित्याहुः वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन हेतुत्वमावश्यकमिति ॥ ननु तथाप्यात्मत्वजातेर्भगवदात्म

साधारण्ये मानाभावइत्यत आह ईश्वरइति आत्मावारेद्रष्टव्यइत्यादिश्रुतावात्मपदव्यवहारादिभावः ननु तर्हीश्वरे सुखाद्युत्पत्तिः कुतो न भवतीत्यत आह अदृष्टादीति आदिना शरीरपरिग्रहः ननु तथापि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावइति नियमेनेश्वरस्य स्वरूपयोग्यत्वे फलोपधानापत्तिरित्यत आह नित्यस्येति अप्रयोजकत्वादिति जलपरमाणौ स्नेहानुत्पत्त्यातादृशनियमेमानाभावादितिभावः

ईश्वरेपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः नित्यस्यस्वरूपयोग्यस्यफलावश्यंभावनियमइत्यस्याप्रयोजकत्वात् परंतु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् नचदशमद्रव्यत्वापत्तिः ज्ञानवत्वेन विभाजनादित्याहुः इंद्रियाद्यधिष्ठाता इंद्रियाणां ४

नन्वीश्वरे दृष्टं कुतो नोत्पद्यतइति चेन्न मिथ्याज्ञानरूपकारणाभावात् मिथ्याज्ञानस्यादृष्टहेतुत्वे च मुक्तात्मन्यदृष्टोत्पत्तिप्रसंगः वेदस्यात्मपदादेर्ज्ञानादिमतिलक्षणापत्तिरित्यस्वरस आहुरित्यनेन सूचितः इंद्रियाद्यधिष्ठातेति मूलमात्मनि प्रमाणपरतया व्याचष्टे इंद्रियाणामिति।

आदिपदसंग्राह्यमाह ४

शरीरस्येति परंपरया जनकतासंबंधेनावच्छेदकतासंबंधेनवाचैतन्यज्ञानवत्वंम् एतेनात्मनिप्रमाणंदर्शितं अचेतनंचेतनाधिष्ठितंकार्यंक
रोतीतिव्याप्तेः अहंसुखीत्यादि नाहंजानाम्यहंकरोमीत्यादिपरिग्रहः नचात्मतावन्नप्रत्यक्षइतिसूत्रभाष्यविरोधइतिवाच्यंम् आत्मत्व
विवेकपरात्माभिप्रायेण भाष्यव्याख्यानस्यप्रदर्शितत्वात् ॐ विप्रतिपन्नंप्रतीति अहमितिप्रतीतेः शरीराद्यतिरिक्तविषयकत्वे विप्रतिऽपन्नं

तथापिविप्रतिपन्नंप्रतिप्रथमतएवशरीरादिभिन्नस्तत्प्रतीतिगोचरइतिप्रतिपादयितुंनशक्यतेइत्यतः प्रमाणांतरं
दर्शयति करणंहिसकर्तृकंम् वास्यादीनांछिदाकरणानां कर्तारमंतरेणफलानुपधानंदृष्टंम् एवंचक्षुरादीनांज्ञा
नकरणानामपिफलोपधानंकर्तारमंतरेणनोपपद्यतइत्यतिरिक्तः कर्ताकल्प्यते ननुशरीरस्यकर्तृत्वमस्त्वत।
(आह शरीरेषुनचैतन्यमृतेषुव्यभिचारतः ननुचैतन्यज्ञानादिकमेवमुक्तात्मनां त्वन्मतइवमृतशरीराणामपितदभा

प्रतीत्यर्थः नैयायिकमतेयथा मुक्तात्मनां १ ज्ञानाभावेन नज्ञानाधिकरणत्वरूपंचैतन्यंम् तथाममापिमते मृतशरीरस्यनचैतन्यमिति
शरीरमेवात्मेतिवादी चार्वाकः शंकते ननु चैतन्यमिति ज्ञानादिकं ज्ञानाद्यधिकरणत्वं तदभावे ज्ञानाद्यभावे ननुतवमते मृतशरीरेचैतं

तंन्याभावः किंन्निबंधनः मंन्मतेतु प्राणविशिष्टात्मनोविरहएव तत्रप्रयोजकइत्यतआह प्राणाभावेनेति तथाचलाघवात्प्राणाभावस्यैवैतं न्यविरहे प्रयोजकइतिभावः चार्वाकमतंपरिहरति नेति स्मरणानुपपत्तेरिति अनुभावाश्रयस्यबाल्यशरीरस्यतदानीमभावादितिभाः वः

प्राणाभावेन ज्ञानाभावस्यसिद्धेरितिचेंन्न शरीरस्यचैतंन्ये बाल्यविलोकितस्यस्थविरेस्मरणानुपपत्तेः शरीराणामवयवोपच यापचयैरुत्पादविनाशशालित्वात् नचपूर्वशरीरोत्पंन्नसंस्कारेणद्वितीयशरीरेसंस्कारउत्पाद्यतइतिवाच्यंम् अनंतसंस्कार कल्पनेगौरवात्॥

ननुबाल्यशरीरं तदास्त्येवेत्यतआह शरीराणामिति संस्कारउत्पाद्यतइति तथास्वप्रयोज्यसंस्कारवत्वसंबंधेनबाल्यशरीरसमवेता नुभवस्यस्थविरशरीरेसत्वान्नस्मरणानुपपत्तिरितिभावः गौरवस्यफलमुखत्वात् दूषणांतरमाह एवमिति॥

नतु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत्यत आह अदृष्टविशेषेति इति जलग्रंथः ॐ समवायिकारणभिन्नेषु परमा
णुषु तेजस्त्व जातिसिद्धिरित्यत आह तस्येति तेजस्त्वस्येत्यर्थः जलत्वस्येवेति यथा जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलप
रमाणौ जलत्वजातिसिद्धिस्तथा जन्यतेजस्त्वावच्छिन्नजनकेनेतावच्छेदकतया। तेजः परमाणावपि तेजस्त्वरूपजातिसिद्धिरित्यर्थः
इदमुपलक्षणं समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रतिसमवायेन तेजःसंयोगत्वेन हेतुत्वात्तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम्

रसाभिव्यंजकोदकवत् रसनेंद्रियसंनिकर्षे व्यभिचारवारणाय इत्यलं देयम् विषयं दर्शयति सिंधुरिति सिंधुः समुद्रः हिमं तु
षारं आदिपदात्सरित्कासारकरकादिः सर्वोपि ग्राह्यः नच हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम् उष्मणा विलीनस्य
तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्र
तिरोधानकरकाया काठिन्यप्रत्ययस्य भ्रांतित्वात्तेजो निरूपयति उष्णः स्पर्शस्तेजसस्तु उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्य

चंद्रकिरणादावित्यादिना रत्नकिरणादेः परिग्रहः तत्रापि चंद्रकिरणादावपि ननु तत्र औष्ण्यप्रतीतिः कुतो नेत्यत आह किं त्विति तदंतः
पातिजलस्पर्शेनेति चंद्रकिरणांतर्गतजलभागशीतस्पर्शेनेत्यर्थः ननु चक्षुरादिनिष्ठस्योष्णस्पर्शस्य केनाप्यनभिभूतत्वात्प्रत्यक्षापत्ति

१ इत्थं चेति उष्णत्वजातिसिद्धौ चेत्यर्थः ननु कथं तर्हि जन्योष्णस्पर्श १

रत आह चक्षुरादौ चेति मरकतकिरणादावित्यादिना सुवर्णपरिग्रहः स्याद्रूपं शुक्लं भास्वरमिति मूलं तत्र शुक्लेति स्वरूपकथनं भास्वररूप
मात्रस्य लक्षणत्वेऽतिप्रसंगाभावात् भास्वरत्वं जातिविशेषः स च तेजोरूपमात्रवृत्ति शुक्लत्वव्याप्यश्चेति ॥ ननु रूपादिविषयकद्रव्यप्रत्यक्षस्या
भावाद्वैश्वानरादेश्चाक्षुषत्वानापत्तिरिति शंकते तद्रूपाग्रह इति वैश्वानरादेरचाक्षुषत्वे तद्गतसंख्यादिगुणानामपि चाक्षुषत्वं न स्यादिति योग्यव्य
क्तिमात्रवृत्तित्वाभावादित्यपि नास्फुचितम् अन्यदीयरूपेणैवेति पार्थिवरूपेणैवेत्यर्थः मतांतरमाह वह्नेस्त्विति सुवर्णादिरूपे तेजसि त

इत्थं च जन्योष्णस्पर्शासमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः तस्य परमाणुवृत्तित्वं तु जलत्वस्येवाऽनुसंधेयम्
न चोष्णस्पर्शवत्त्वं चंद्रकिरणादावव्याप्तमिति वाच्यम् तत्राप्युष्णस्य सत्त्वात् किंतु तदंतःपाति जलस्पर्शेनाऽभिभवादग्रहः
एवं रत्नकिरणादौ च पार्थिवस्पर्शेनाभिभवात् चक्षुरादौ चानुद्भूतत्वादग्रहः स्याद्रूपं शुक्लं भास्वरं वैश्वानरे मरकतकिरणादौ च

ऽसत्वादिति तेन नासंभव इ भावः ॥ पृथिव्यवृत्तीति नैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् पृथिवीत्वरू
प जातिमादाय पृथिव्यामतिव्याप्तिवारणाय पृथिव्यवृत्तीति पृथिव्यवृत्ति जलत्वजातिमादाय जले पृथिव्यवृत्ति वायुत्वादिकमादाय वायावति
व्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति वायुतेजोन्यतरत्वमादाय वायावतिव्याप्तिवारणाय जातीति परकीयस्पर्शादिति गंधाव्यंजकत्वा
म् पार्थिवरूपेणाभिभवात् शुक्लरूपाग्रहः ननु तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न अन्यदीयरूपेणापि धर्मिणो ग्रहसंभवात् शंखस्येव १

द्विघटितहेत्वंतरसूचनायादिपदेन गंधादिपरिग्रहः चक्षुषः परकीयरूपादिग्राहकत्वादसिद्धिवारणाय स्पर्शपदं अत्र केचिदाहुः चक्षु
र्विषयासंबद्धमेव ग्राहकं यदि प्राप्यप्रकाशकारी स्यात् तदा रसनादिवदधिष्ठानसंबद्धं गृह्णीयात् न चैवं गोळकासंबद्धग्रहणात् किंच यदि
चक्षुः प्राप्य गृह्णीयात्तर्हि स्वतोधिकपरिमाणं न गृह्णीयात् न खलु नखरंजनिका परशुच्छेद्यं छिनत्तीति शाखाचंद्रमसोस्तुल्यकालग्रहणा
नापत्तिश्च गतिक्रमेण प्राप्यग्रहणे हि संनिहितक्रमेण ग्रहणं स्यात् न तु तुल्यकालमुपलंभः अनुभवति तु मीलयंल्लेव नयने शाखां शीतमयूखं च
एवं च प्राप्यकारित्वानुरोधेन गोळकातिरिक्तं चक्षुः परैरंगीक्रियते गोळकस्य चंद्रादिप्राप्त्यसंभवात् अप्राप्यकारित्वे च गोळकमेव चक्षुस्तच्च न
तैजसमिति तदसत् अधिष्ठानासंबद्धार्थग्राहिण्याः प्रदीपप्रभायाइव चक्षुषोपि प्राप्यकारित्वसंभवात् पृथुतरग्रहणस्य च गोळकनिर्गतस्य
महतश्चक्षुषः पृथुत्वेन प्रदीपप्रभायाइवोपपत्तेः स्वाधिकपरिमाणवद्द्रव्यग्राहिणा त्वगिंद्रियेण व्यभिचारात् तादृशनियमे मानाभावाच्च तुल्य
कालग्रहणं चासिद्धमेव तदभिमानस्य कालसंनिकर्षेणैवोपपत्तेः अचिंत्यो हि तेजसो लाघवातिशयेन वेगातिशयः यत्प्राचीनाचलचूडा
वलंबिन्येव भगवति मयूखमालिनि भवनोदरेप्यालोक इत्यभिमानो लोकानां यच्चाहुः शालिकाचार्याः चक्षुर्बाह्यालोकाप्यायमारब्धेन चक्षुषा तावदर्थ
संस्पृष्टेन युगपत्तावदर्थग्रहणमिति शाखाचंद्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति तन्न चक्षुर्बाह्यालोकाप्यायमारब्धस्य चक्षुषः पृष्ठभागेपि सत्त्वात्
गुप्तपित्तपीतिम्नावह्नेस्तु शुक्लं रूपं नाभिभूतं किं तु तदीयं शुक्लत्वमभिभूतमित्यन्ये नैमित्तिकमिति सुवर्णादिरूपे तेजसि न सत्त्वात् न चैवं नैमित्तिकद्रवत्ववत्वं न लक्षणं २

२ मुद्गनादावव्याप्ते घृतादावव्याप्तेश्चेति वाच्यम् पृथिव्यवृत्ति नैमित्तिक द्रवत्ववद्वृत्ति जातिमत्त्वस्य विवक्षितत्वात् पूर्ववदिति जलस्येवेत्यर्थः तथाहि तद्द्विविधं नित्यमनित्यं
च नित्यं परमाणुरूपं तदन्यदनित्यं अवयवि तच्च त्रिधा शरीरेन्द्रियविषयभेदात् शरीरमयोनिजमेवेत्यर्थः तच्च सूर्यलोकादौ प्रसिद्धं अत्र योविषयस्तमाह इंद्रि
पृष्ठभागस्थित पदार्थग्रहणापत्तेः पृष्ठदेशस्य बाह्यालोकैश्चक्षुरुत्पादे मानाभाव इति चेदग्रदेशस्थ बाह्यालोकैरपि तदुत्पादे मानाभावः
तदनभ्युपगमेपि चाक्षुषोपपादनस्यानुपदमुक्तत्वादिति लाघवादाह अथवेति तैजसत्वे किं मानमिति सुवर्णं पार्थिवं नैमित्तिक द्रवत्ववत्वादि
त्यनुमानस्य पार्थिवत्वसाधकस्यैव सत्त्वात्समाधत्ते नेति सुवर्णमिति नचात्र पीतरूपवद्द्रव्यात्मकस्य सुवर्णस्य पक्षत्वे बाधः तैजससुवर्णस्य
यमिति चक्षुस्तैजसं परकीयस्य शीघ्रव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यंजकत्वादाद्यं परकीयेति घटादेः स्वीयरूपव्यंज
कत्वात् व्यभिचार वारणाय अथवा प्रभायाः दृष्टान्तत्व संभवादाद्यं परकीयेति न देयम् चक्षुस्सन्निकर्षे व्यभिचार वारणाय द्रव्य
द्वितीयं परकीयेति + त्वं देयम् विषयं दर्शयति वह्निरिति ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न - - - -

पूर्वमसिद्ध्या पक्षाप्रसिद्धिः धर्मशास्त्रे पीतद्रव्येपि सुवर्णपदप्रयोगेन तस्यापि सुवर्णपदवाच्यतया सुवर्णपदवाच्यत्वस्य पक्षतावच्छेदकत्वे बाधतादव
स्थ्यादिति वाच्यम् अत्यंतानलसंयोगे सत्यनुच्छिद्यमान द्रवत्वाधिकरणत्वस्यैव पक्षतावच्छेदकत्वात् अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया
पक्षतावच्छेदकत्व भेद प्रयुक्तस्य सामानाधिकरण्येन सिद्धसाधनस्यादोषत्वात् ४ असति प्रतिबंधक इति जलमध्यस्थ घृतादौ व्यभिचार

वारणाय। सति प्रतिबंधक इति अ।ग्निसंयोगनाश्यद्रवत्वतिघृतादौ व्यभिचारवारणाय संयोगे सत्यंतम् तादृशद्रवत्वस्य स्वस
मानाधिकरणात्यंताग्निसंयोगासमानकालीनत्वं न व्यभिचार: अनुच्छिद्यमान द्रवत्वादित्यस्यानुच्छिद्यमानद्रवत्वाधिकरण
त्वादित्यर्थेनित्यच्छिद्यमानद्रवत्वानधिकरणत्वादिति गगनादौ व्यभिचारात् अग्निसंयोगनाश्यत्वादिति एतच्चोपलक्षणंमूल

सुवर्णंतैजसं असति प्रतिबंधके अत्यंतानलसंयोगे व्यनुच्छिद्यमानद्रवत्वात् यन्नैवंतन्नैवं यथा पृथि
वीति नचाप्रयोजकं पृथिवीद्रवत्व त्वस्य जंन्यजलद्रवत्वस्यात्यंताग्निसंयोगनाश्यत्वात् ननुपी
तिमगुरुत्वाश्रयस्यापि तदानींद्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमसीक्षोदवत्तस्याद्रुतत्वात् छ

अग्नेरपत्यं प्रथमं हिरण्यमित्याद्यागमान्यथानुपपत्तेरप्यनुकूलतर्कत्वादिति एतेनाश्रयनाशजंन्य द्रवत्वनाशे व्यभि
चार वारणाय द्रवत्वे आश्रयनाश्य द्रवत्ववृत्तिं जातिविशेषं कल्पयित्वा विजातीयद्रवत्वनाशं प्रत्यग्निसंयोगत्वेन

हेतुतास्वीकार्या तच्चैवं जात्यंसुवर्णद्रवत्वव्यावृत्तमपीतिदर्शितानुकूलतर्को असंगतः सुवर्णस्यपृथिवीत्वेपितदीयद्र
वत्वस्याग्निसंयोगनाश्यतावच्छेदकानाक्रांततया अत्यंताग्निसंयोगसत्वेपिनाशापत्तेरसंभवादित्यपास्तंम् क्षोदश्चूर्णम्

अपरेतु पीतिमाश्रयस्यात्यंताग्निसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात्तत्प्रतिबंधकं
विजातीयद्रवद्रव्यंकल्प्यते तथाहि अत्यंताग्निसंयोगि पीतिमगुरुत्वाश्रयः विजा
तीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः अत्यंताग्निसंयोगसत्यपि पूर्वरूपविजातीय
रूपानधिकरणत्वात् जलमध्यस्थपीतपटवत् ॥ ॥ ॥ ॥ –

तस्यपीतिमगुरुत्वाश्रयस्य प्रकारांतरेणतस्य तैजसत्वंसाधयतां मतमुपन्यस्यति अपरेत्वित्यादिना तत्प्रतिबंधकम् रूपपरा

त्तिप्रतिबंधकं अग्निसंयोगस्यतैजससुवर्णेपिसत्वादुक्तम् पीतिमेति साध्येविजातीयपदमुद्देश्य सिध्यर्थं हेतौसत्यंतमग्नि संयोगरहिते पूर्वरूपविजातीयरूपानाधारे घटे व्यभिचारवारणायात्रहेतौ पृथिवीत्वं देयम् तेन जलपरमाणौनव्यभिचारः यथाकथंचिदग्निसंयुक्त घटेतद्वारणायात्यंतेति नचाप्रयोजकत्वं विरोधिद्रवद्रव्यसंबंधं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वादितिभावः नचद्रव्यादन्यदेव प्रतिबंधकंवाच्यम् अदृष्टकल्पनापत्तेरिति तस्येति तस्यद्रवद्रव्यस्य पृ

तस्यचपृथिवीजलभिन्नस्यतेजस्त्वनियमात्

थिवीजलभिन्नस्येति पृथिव्याः पक्षीकृतपीतिमाश्रयायाविजातीयत्वाभावाज्जलस्यतत्रासंभवादितिभावः तेजस्त्वनियमादिति वाय्वादेरूपाभावादितिभावः नचांधकारेपीतिमरूपाश्रयद्रव्यग्रहापत्तिः सुवर्णरूपालोकसंयोगसत्वादितिवाच्यं उद्भूतरूपा उद्भूतानभिभूतरूपालोकसंयोगस्यैवद्रव्यप्रत्यक्षेहेतुत्वात् सुवर्णरूपस्यत्वाभिभूतत्वात् नचतदानींपीतरूपस्या

पग्रहत्व सजातीयग्रहणकृतमग्रहणं न तु सुवर्णरूपस्येति न तस्यापि कृतत्वमिति वाच्यम् लघुतया सजातीयसंबंधस्यैवाभि
भवपदार्थत्वात् न च तथाप्यंधकारे सुवर्णस्य साक्षात्कारापत्तिः तेजोभिन्नद्रव्यप्रत्यक्षं प्रत्येवालोकसंयोगस्य हेतुत्वादिति वाच्यम्
सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यप्रत्यक्षं प्रत्येव तस्य हेतुत्वात् नवीनास्तु सुवर्णं पार्थिवमेव पीतं सुवर्णं द्रुतमिति साक्षात्संबंधेन द्रवत्व
प्रतीतेर्भ्रमत्वायोगात् द्रुतं द्रुततरप्रतीतेर्द्रवत्वस्यात्यंतोच्छेदात् पृथिवीत्वस्य पीतरूपसमवायिकारणतावच्छेदकत्वाद्रूपनाशेतादा
वायुं निरूपयति अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिंगकः पूर्ववं
नित्यताद्युक्तं देहव्यापि त्वगिंद्रियम् अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्वादुक्तमपाकज इति अपाक
जस्पर्शस्य जलादावपि सत्वादुक्तमनुष्णाशीतेति ॥ ॥ ॥ ॥

त्म्येन स्वर्णस्य विरोधित्वाच्च पीतरूपनाश इति वदंति इति तेजोग्रंथः ॥ वायौ प्रमाणं दर्शयितुं मूले ऽपाकजो ह्यनुष्णाशीतस्पर्शस्तु पवने मत इ
त्युक्तम् तत्रापाकजादिपदानां क्रमेण व्यावृत्तिमाह अनुष्णाशीतस्पर्शेति उक्तमपाकज इति यद्यप्यपाकजानुष्णाशीतस्पर्शवत्वं पटा

द्रावत्वतिव्याप्तं तथाप्यपाकजानुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं पाकजस्पर्शवद्वृत्ति अनुष्णाशीतस्पर्शवत्वं वृत्तिद्रव्यत्वसा
क्षाद्व्याप्यजातिमत्वं वातदर्थोवसेयः एतेनस्पर्शस्यानुष्णाशीतत्वादिकथनेन तज्जनकतावच्छेदकमिति तथाचविजातीयस्पर्शजनक
तावच्छेदकतयावायुत्वजातिसिद्धिः इदमुपलक्षणं शब्दविशेषस्य वह्नित्वावच्छिन्नस्य चानिमित्तकारणतावच्छेदकतयावायुत्वजातिसिद्धिरपि त्यर
द्रष्टव्यम् मूले स्पर्शादिलिंगकइति २ स्पर्शादीनिलिंगानियस्यसतथा मुक्तावल्यां धृतीति धृतिर्गुरुणोद्रव्यस्यापतनं विजातीयस्पर्शेनेतितृतीयां
एतेनवायवीयविजातीयस्पर्शोदर्शितः तज्जनकतावच्छेदकवायुत्वमितिभावः एववायुस्पर्शादिलिंगकः वायुर्हिस्पर्श
शब्दधृतिकंपैरनुमीयतेविजातीयस्पर्शेनविलक्षणशब्देनतृणादीनां धृत्याशाखादीनांकंपनेनचवयोरनुमानात् ४

नचतुष्कमनुमानादित्यनेनान्वितं अनुमितिप्रकारस्तु योयंरूपवद्द्रव्यासमवेतस्पर्शः सक्कचिदाश्रितः स्पर्शत्वात् पृथिवीसमवेतस्पर्श
वत् पृथिव्यादिस्पर्शेसिद्धसाधनवारणायरूपवद्द्रव्यासमवेत इतिविशेषणम् एवंअसतिरूपवद्द्रव्याभिघातेयोयंपर्णादिषुशब्दसंतानः स
स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवद्रव्यसंबंधिशब्दसंतानत्वात् दंडाभिहतभेरीशब्दसंतानवत् पृथिव्याद्यभिघात

जंन्मनिसिद्धसाधनवारणायासतीत्यादिपक्षविशेषणंम् विभागजंन्मनिशब्दे व्यभिचारवारणायहेतावविभज्यमानेति एवञ्चभासि
तृणतूलस्तनयित्नु विमानादीनांधृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकादिधृतिवत् जलादि
गतः तृणादौ सिद्धसाधनवारणायनभसीति प्रयत्नवदात्मसंयोगहेतुकधृत्यादौ व्यभिचारवारणायास्मदाद्यीति एवंरूपवद्द्रव्या

यथाचवायुर्नप्रत्यक्षस्तथाग्रेवक्ष्यते पूर्ववदिति ॥

भिघातमंतरेणतृणेकर्म स्पर्शवद्वेगवद्द्रव्याभिघातजंन्यंम् विजातीयकर्मत्वात् नदीपूराहतकाशादिकर्मवदिति अग्रेवक्ष्यतइति
आत्मनिरूपणावसरेइत्यर्थः मूलेपूर्ववंनित्यताद्युक्तमिति पूर्ववज्जलवदित्यर्थः नित्यतादीत्यादिना अनित्यत्वपरिग्रहः उक्तंबोध्य
मित्यर्थः एतदेवस्पष्टयतिमुक्तावल्यां वायुर्द्विविधइति तत्र तेषुमध्ये अयोनिजमयोनिजमेवेत्यर्थः पिशाचादीनामिति मरुतांलो

लोके प्रसिद्धमिति शेषः ननु वाय्वीयस्तात्वादि वाग्व्यापाराभावात् करचरणाद्यभावेन चाहरणविहरणाद्यभावात् कथं भोगाय
तनत्वमित्यत आह परंत्विति जलीयतैजसशरीरयोरप्याक्षेपस्य तुल्यत्वात् प्रकरणलाघ।वमभिप्रेत्य साधारण्येनसमाधानमा

वायुर्द्विविधो नित्योऽनित्यः परमाणुरूपो नित्यस्तदन्योऽनित्योऽवयवसमवेतश्च सोपि त्रिविधः शरीरेन्द्रियविषय
भेदात् तत्रशरीरमयोनिजं पिशाचादीनां परंतुजलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भात् उप
भोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति अत्रयो विशेषस्तमाह देहव्यापीति ॥ ॥ ॥ ॥

ह जलीयतैजसवायवीयेति ननु कथं तर्हि जलीयत्वादिव्यपदेश इत्यत आह जलादीनामिति अत्रलगि[द्रि]ययो विशेषो ऽधिष्ठानादि ॥

शरीरव्यापकमिति नचनखलोमकेशादीनां त्वगिंद्रियानाधारत्वादसंभवइतिवाच्यम् तेषांसंयोगिद्रव्यत्वेन शरीरत्वाभावात् मू
लस्थत्वगिंद्रियमित्यस्यत्वचिस्थितमिंद्रियमित्यर्थः एतेनदेहसहसहजावरणंत्वगित्युच्यते तच्चपार्थिवंप्रत्यक्षसिद्धंचेति नें
द्रियं नचवायवीयमिति परास्तम् त्वगिंद्रियलक्षणमाह स्पर्शेति कार्यमात्रजनककालादावतिव्याप्तिवारणायेंद्रियमिति च

शरीरव्यापकंस्पर्शग्राहकमिंद्रियंत्वक् तच्चवायवीयंरूपादिषुमध्येस्पर्शस्यैवाऽभिव्यंजकत्वात्
अंगसंगिसलिलशैत्याभिव्यंजकव्यजनवत्पवनवत् ४

क्षुरादावतिव्याप्तिवारणायस्पर्शग्राहकेति त्वक् त्वगिंद्रियमित्यर्थः तच्चेति त्वगिंद्रियं पक्षेस्पर्शत्वाभिव्यंजकत्वादसिद्धि
वारणायरूपादिषुमध्यइति मनसिव्यभिचारवारणायएवकारः त्वगिंद्रियसंनिकर्षेव्यभिचारवारणायद्रव्यत्वेसतीत्यपिबोध्यम्

अंगसंगिसलिलंस्वेदः आकरेप्रसक्तपादभाष्यादौ प्राणस्त्वेक एवेति कथंतर्ह्यपानादि व्यवहारइत्यत आह स्थानवशादिति-
हृदिप्राणोगुदेऽपानः समानोनाभिसंस्थितः उदानःकंठदेशस्थो व्यानस्सर्वशरीरगइति स्थानभेदादित्यर्थः क्रियाभेदाच्चेति मुख
नासिकाभ्यांनिष्क्रमणप्रवेशनात्प्राणः मलादीनामधोनयनादपानः आहारेषुपाकार्थं वन्हेस्समुन्नयनात्समानः ऊर्ध्वंनयनादु

विषयंदर्शयति प्राणादिस्तुमहावायुपर्यंतोविषयोमतः यद्ययनि॰ त्योवायुश्चतुर्विधस्तस्यचतुर्थरवि
धाप्राणादिरित्युक्तमाकरेतथापिसंक्षेपादेवंत्रैविध्यमुक्तम् प्राणस्त्वेकएवहृदादिनानास्थानवशान्मुखनि
र्गमनादिनानाक्रियाभेदाच्चनानासंज्ञांलभतइति पर्यवसितोवायुः ॐ ॐ ॐ ॐ श्री

दानः नाडीमुखेषुवितननाद्व्यानइतिक्रियाभेदाधिपंचसंज्ञांलभतेनतु संज्ञाभेदेन संज्ञिभेदइतिभावः ॐ इतिवायुग्रंथः ॐ

आकाशेति कालत्वंदिक्त्वंनजातिरित्यप्येवक्तव्यम् तल्लाघवेनात्रैवप्रसंगाद्युगपदभिदधाति नजातिरिति अनेकसमवेतत्वाभावादिति
शेषः तेनैकव्यक्तित्वस्यजात्यभावहेतुत्वेवैयधिकरण्यमिति प्रत्युक्तम् किंत्विति आश्रयताचात्रसमवायेनविवक्षिता तेनकालस्यजगदाधार
त्वेनशब्दाश्रयत्वेपिनक्षतिः मूलेवैशेषिकपदस्यवैयर्थ्यमाशंक्याह वैशेषिकइति इत्थंचशब्दइतिमूलंसावधारणंज्ञेयम् एतेनविशेषगुणत्व

आकाशंनिरूपयति आकाशस्यतुविज्ञेयः शब्दोवैशेषिकोगुणः आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकंनजातिः किंतु
आकाशत्वंशब्दाश्रयत्वं वैशेषिकइतिकथनंतुविशेषगुणांतरव्यवच्छेदाय एतेनप्रमाणमपिदर्शितम् तथाहि शब्दोगुणश्चक्षुर्ग्र
हणायोग्यबहिरिंद्रियग्राह्यजातिमत्वात् स्पर्शवत् शब्दोद्रव्यसमवेतः गुणत्वात् संयोगवदित्यनुमानेनशब्दस्यद्रव्यसमवेतत्वसिद्धे

कथनेनप्रमाणमित्याकाशइत्यादिः तच्चशब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वेसति द्रव्याश्रितत्वादित्येवंरूपंबोध्यं
दर्शितं सूचितं अत्रानुमानेस्वरूपासिद्धिंपरिहर्तुमाह तथाहीति घटादौव्यभिचारवारणायायोग्येति आत्मनिव्यभिचारवारणायबहिरिंद्रिय

ग्राह्येति रसत्वादौव्यभिचारवारणाय जातिमदिति एतच्चानुमानमग्निमद्रव्यसमवेतत्वसाधकानुमानेस्वरूपासिद्धिनिरासायेतिबोध्यम्
गुणत्वादिति एतदनुमानेनोक्तपरिशेषानुमाने हेतोर्विशेष्यासिद्धिर्निरस्ता· विषणासिद्ध्युद्धाराय आह शब्दोनेति नस्पर्शवद्विशेषगुणइ
ति नस्पर्शवतोद्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुणइत्यर्थः अकारणगुणपूर्वकप्रत्यक्षत्वादिति अकारणगुणपूर्वकत्वेसतिप्रत्यक्षत्वा

शब्दोनस्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणत्वाभावेसति अकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत् पाकजरूपादौव्यभि
चारवारणाय सत्यंतं घटरूपादौव्यभिचारवारणाय अकारणगुणपूर्वकेति जलपरमाणुरूपादौव्यभिचारवारणायप्रत्यक्षेति छ छ

दित्यर्थः हेतुसत्त्वंप्रतिपादयितुं पाकजेति जलपरमाण्विति अनित्यानांपार्थिवरूपादीनां केषांचिदग्निसंयोगासमवायिकारणकत्वात् केषां
चित्कारणगुणपूर्वकत्वादत्रोपेक्षा नदिक्कालेति शब्दइत्यनुवर्त्तते बहिरिंद्रियेति मनसोऽन्यदिंद्रियंबहिरिंद्रियम् योग्यत्वात्प्रत्यक्षत्वादित्यर्थः
एतेनात्मगुणग्राहकेंद्रियत्वं बाह्येंद्रियत्वंतच्च मनस्यतिप्रसक्तं तेनापिरूपादिग्रहणादितिनिरस्तं इत्थंचानेनप्रकारेणपृथिव्याद्यष्टद्रव्यानाश्रितत्व

६.

सिद्धौ चसिध्यतीति पूर्वोक्तपरिशेषानुमानेन सिध्यतीत्यर्थः नन्वेतत्सर्वं तदोपपद्यते यदि शब्दस्य विशेषगुणत्वे किंचित्प्रमाणंस्यात्तत्रैव मानंन्नपश्यामइतिचेन्न शब्दोविशेषगुणः लौकिकप्रत्यासत्त्येंद्रियग्राह्यत्वेसति लौकिकप्रत्यासत्या। द्वींद्रियग्रहणयोग्यताराहित्येचसति गुणत्वव्याप्यजातिमत्वादित्यनुमानस्यैव तत्रप्रमाणत्वात् प्रभात्वमादायव्यभिचारवारणायगुणत्वव्याप्येति गुरुत्वत्वमादाय व्यभिचारवारणाय

नदिक्कालमनसांगुणः विशेषगुणत्वात् रूपवत् नात्मविशेषगुणः बहिरिंद्रिययोग्यत्वात् रूपवत्
इत्थंचशब्दाधिकरणंनवमंद्रव्यम् गगनात्मकंसिध्यति नचवाय्ववयवेषुसूक्ष्मशब्दक्रमेणवायो
कारणगुणपूर्वकः शब्दउत्पद्यतामिति वाच्यम्

प्रथमंसत्यंतं संख्यात्वमादाय व्यभिचारवारणायद्वितीयंसत्यंतं सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासुप्रकृतहेतोरभावेपि तत्रद्वेत्वांतरेणैवविशेषगुणत्वंसाधनीयमिति पूर्वोक्तानुमानेबाधं स्वरूपासिद्धिंचाशंकते नन्वेति वायाविति तथाचस्पर्शवद्वायुगुणत्वस्यतत्र

सत्वात्तदभाव साधने बाध इति भावः कारणगुणपूर्वकत्वाः कथनं त्वकारणपूर्वकत्वघटितहेतोरसिद्धिप्रदर्शनार्थम् अयावद्द्रव्यभावित्वेने
ति स्वाश्रयनाशाजन्य नाशप्रतियोगि यद्यत्तद्भिन्नत्वेनेत्यर्थः ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं मिं किंति नोपन्यस्तमितिचेंन्न चाक्षुष
त्वप्रयोजकस्य महत्वे सत्युद्भूतरूपवत्वस्याकाशेऽसंभवेन चक्षुषः प्रमाजनकत्वासंभवात् ननु यद्याकाशो न चाक्षुषस्तदेह पक्षीतिचाक्षु
षाधिकरणत्वेन किं भासतेइतिचेदालोक एवेतिपरिकल्प्य नन्वाकाशीयशरीरविषययोः प्रदर्शनमुचितां कथमिंद्रियप्रदर्शनमिंद्रियं

अयावद्द्रव्यभावित्वेन वायोर्विशेषगुणत्वाभावात् तत्रच शरीरस्यविषयस्य चाभावात् इंद्रियंदर्शयति इंद्रियंतु भवेच्छ्रोत्रमेकस्सं
न्नप्युपाधितः नन्वाकाशंलाघवादेकं सिद्धं श्रोत्रंपुरुषभेदाद्भिन्नं कथमाकाशंस्यादितिचेत्तत्राह एकेति आकाश एक स्सन्नपिउपा
धेः कर्णशष्कुलीभेदाद्भिन्नश्रोत्रात्मकं भवतीत्यर्थः

तु भवेच्छ्रोत्रमित्यनेनग्रंथेन किं यतइत्याशंक्याह तत्रचेति व आकाशेचेत्यर्थः कर्णशष्कुलीभेदादिति चैत्रादिकर्णशष्कुलिअवच्छिन्न
माकाशं चैत्रादिश्रोत्रमितिभावः नव्यास्तु शब्दमनित्यं निमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वं नचेश्वरस्य शब्दस

मवायिकारणत्वं जीवस्यैवेत्यत्रविनिगमनाविरहः जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापिमानसत्वापत्तेः अदृष्टादिवत्प्रतिबंधक
कल्पनेचातिगौरवं नचैवंकर्णशष्कुलीविवरावच्छिंन्नाकाशस्य कथंश्रोत्रत्वोपपत्तिरितिवाच्यंम् तथाविधस्येश्वरस्यैवश्रोत्रत्वोपपत्तेरित्याहुः
स्वतंत्रास्तुमृदंगादीनामेवगुणः शब्दः शब्दंप्रतिमृदंगत्वादिना समवायिकारणतायाः स्वीकारात् प्राचीनैरपि मृदंगत्वादिनानिमित्तकार
णतायाः स्वीकारात् मृदंगेशब्द इत्यादि प्रतीतेश्च नचतत्रावच्छेदकत्वं विषयः मानाभावात् अन्यथातत्रावच्छेदकताख्यस्वरूपसंबंध

छ जंन्यानांजनकः छ ५

स्यअंन्यत्रसमवायस्यकल्पनेगौरवादितिवदंतीति इत्याकाशग्रंथः छ मूलेजंन्यानांजनकइति कार्यत्वावच्छिंन्नंप्रति निमित्तकारण
मित्यर्थः अत्रचकालिकसंबंधावच्छिंन्नकार्यत्वावच्छिंन्न कार्यतानिरूपितमधिकरणतया निमित्तत्वं काललक्षणंम् कालिकसंबंधा
वच्छिंन्नेति करणादिष्वधिकरणतयेतिकरणादृष्टेश्वरयोर्नातिव्याप्तिरितिबोध्यंम् ननुकार्यमात्रंप्रति कालस्य(ध्य)निमित्तकारण
त्वे किं मानमिति-तिचेदत्राहुः अद्यघटोभविष्यति श्वः पटोभविताइत्यादि प्रत्ययेन तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालोविषयीक्रि

क्रियंते तत्तदुत्पत्त्यधिकरणत्वेन व्यवहारविषयस्य तत्तदुत्पत्तिहेतुत्वनियमात् तदुत्पत्तिहेतुत्वस्य तद्धेतुत्वव्याप्यत्वात् एवंच तत्तत्कार्यविशेषंप्रति
तत्तत्कालविशेषस्यहेतुत्वसिद्धेर्यद्विशेषयोरिति व्याख्याकार्यमात्रे कालस्यहेतुतासिद्धिरिति साचहेतुतानिमित्तकारणतैव नचकार्यमात्रे
कालस्यहेतुत्वंनसंभवति स्वसमवेतद्वित्व पृथक्त्वसंयोगविभागंप्रति कालस्य समवायिकारणत्वेनतद्भिन्नत्वघटितस्य निमित्तकारणत्व
स्यतत्राभावादित्याचार्योक्तिं शंक्यम् समवायसंबंधेनद्वित्वादिकंप्रति तस्य समवायिकारणत्वेपि कालिकसंबंधेनद्वित्वादिकंप्रतिनिमि
त्तकारणत्वस्यानपायात् एवमेवकार्यमात्रेदिशोपिनिमित्तकारणत्वंबोध्यम् मुक्तावल्यांतत्रेति · तत्रकाले जगतामाश्रयोमतइतिका
लः सर्वदानितिप्रतीत्या सर्वाधिकरणत्वेन कालसिद्धिरिति भावः नन्वेतादृशीप्रतीतिर्दिग्विषयिण्येवास्तु अतिरिक्तकालकल्पने
गौरवादिति नकेवलमनयाकालः सिध्यति - परंतु प्रमाणांतरेण कालेसिद्धे प्रकृतप्रतीतिबलात्सर्वाधारत्वंकल्प्यतइत्याह इदा
नीमित्यादिना । सूर्यपरिस्पंदादिकमिति नचेदानींतदानीमिति प्रतीतिर्महाकालंविषयीकरोतीतिवाच्यं तथासतीदानींपटोन

७

तदानीमिति प्रत्ययानुपपत्तेः नच तत्तत्क्रियाविशिष्ट महाकाल एवेदानीमित्यादिप्रत्ययविषयस्तथाचेदानीं घटेन तदानीमिति प्रत्ययस्यैतत्क्रियाविशिष्ट महाकाले घटेन तत्क्रियाविशिष्टमहाकाल इत्यर्थ इति वाच्यम् तथा सति तत्तत्क्रियाविशिष्ट महाकालापेक्षया लाघवेन तत्तत्क्रियाया एव तादृशप्रतीतिविषयत्वस्यौचितत्वात् इतीत्यनंतरं स्वाश्रयतपनसंयोगिसंयोग एव संबंधो वाच्यस्तत्रेति शेषः नचाकाशमेव संबंधघटकमास्तामिति वाच्यम् आकाशदिगात्मनां विनिगमनाविरहेणातिरिक्तैककालस्य तथात्वात् इत्थं चेति अतिरिक्त

कालो जगतामाश्रयो मतः तत्र प्रमाणं दर्शयितुमाह जगतामाश्रय इति इदानीं पट इत्यादिप्रतीतिः सूर्यपरिस्पंदादिकं यदा विषयीकरोति तदा सूर्यपरिस्पंदादिना घटादेः संबंधो वाच्यः सच संबंधः संयोगादिर्न संभवतीति

॥ काल एव संबंधघटकः कल्प्यते ॥

कालसिद्धौ चेत्यर्थः संभ्यगिति कालः सर्ववानिति प्रतीतेरतिरिक्तकालविषयकत्वस्यौचितत्वादिति भावः परत्वापरत्वबुद्धेरिति ॥

ज्येष्ठे परत्वप्रत्ययः कनिष्ठे अपरत्वप्रत्ययः सचरूपे त्वापरत्वगुणविशेषाधीनः परत्वापरत्वे च सासमवायिकारणके भावकार्यत्वात् असमवायिकारणं च तयोः कालपिंडसंयोग एवेति परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धिरिति भावः परत्वापरत्वयोरित्यस्यैव वक्तुमुचितत्वेऽपि तद्बुद्धिपर्यंतानुधावनं कालिकपरत्वापरत्वयोः प्रमाणं दर्शयितुं नच पिंडगतरूपादेरेव परत्वापरत्वासमवायिकारणत्वमस्त्विति वाच्यम् कालिकपरत्वापरत्वयोर्वायावुत्पत्त्या व्यभिचारात् अत एव पृथिवीपिंडसंयोगस्य न तत्र कारणत्वं पृथिव्य

इत्थं च तस्याश्रयत्वमेव सम्यक् प्रमाणांतरं दर्शयति परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः परत्वादिबुद्धेरसाधारणं निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः काल एव कल्प्यत इति भावः

संयुक्तपदार्थेऽपि परत्वापरत्वयोरुत्पादेन व्यभिचारात् ननु तथाप्याकाशदिगात्ममनोभिः पिंडसंयोगस्य तथात्वं स्यात् किं कालकल्पनयेत्यत आह लाघवादिति आकाशदिग्भ्यां पिंडसंयोगस्य तथात्वे जीवात्मभिः प्रत्येकं विनिगमनाविरहादात्ममनसोरस्थिरत्वात् न तथात्वं

किंतुलाघवादतिरिक्तः कालएवतथात्वेनकल्प्यतइतिभावः ननुयदि कालएकएवतदाक्षणलवकाष्ठादिना व्यवहारस्तत्रनस्यात् नचैकस्मिंन्नेवघ
टेघटःकलशःकुंभइतिव्यवहारवदत्रापिक्षणादिनानाव्यवहारेबाधकाभावइतिवाच्यम् एकस्मिंन्विरुद्धनानाव्यवहारायोगात् नहिघटत्वकलश
त्वादिदिकंमिथोविरुद्धंक्षणत्वदिनत्वादिकंतुविरुद्धमेव नहिक्षणंदिनमिति प्रतीतिरस्तीत्याशंकते नन्वेकस्येति समयभेदः समयभेदव्यवहारः वि
भिन्नव्यवहारविषयइतियावत् एकस्मिन्विरुद्धनानाव्यवहारविषयत्वाभावादितिभावः उपाधिभेदादिति तथाचैकस्यकालस्यकिंचिद्धर्मविशिष्ट

नन्वेकस्यकालस्यसिद्धौक्षणदिनमासवर्षादि समयभेदोनस्यादित्यतआह क्षणादिस्यादुपाधितः कालस्त्वेकोप्युपाधिभेदात्क्षणादि
व्यवहारविषयः उपाधिस्तुस्वजन्यविभागप्रागभावावच्छिन्नंकर्मपूर्वसंयोगावच्छिन्नपूर्वसंयोगनाशावच्छिन्नोउत्तरसंयोगप्रागभावोवा ४५

स्यक्षणत्वं किंचिद्धर्मविशिष्टस्यदिनत्वंनतुकेवलस्येतिभावः इदमुपलक्षणं तादृशोपाधीनामेवक्षणत्वादिव्यवहारविषयत्वं नतुमहाकालस्येत्यपिद्रष्टव्यम् स्वज
न्येति स्वक्रियाघटगतैकक्रियानाशोत्तरोत्पन्न तद्गतक्रियांतरजन्यविभागप्रागभावविशिष्टस्यप्रथमकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिरतःस्व

जंन्येति नन्वेवं प्रथमक्षणे क्षणव्यवहारोपपादनेपि द्वितीयक्षणे कथं तदुपपादनं तत्र क्रियाजंन्यविभागोत्पत्त्या विभागप्रागभावासंभवात् नच द्वितीय
क्षणोत्पंन्नक्रियांतरस्यैव निरुक्तविशिष्टस्य तत्र क्षणत्वमिति वाच्यम् प्रतिक्षणं क्रियोत्पत्तौ मानाभावात् अतस्तत्रापि क्षणव्यवहारोपपादकमुपाधि
माह पूर्वसंयोगेति स्वजंन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजंन्यविभाग इत्यर्थः तेन स्वजंन्यविभागस्य यत्किंचित्पूर्वसंयोगविशिष्टस्य द्वित्रिक्ष
णवृत्तित्वेपि यत्किंचिद्विभागस्य स्वजंन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेपि न क्षतिः तृतीयक्षणे तदुपपादकमुपाधिमाह पूर्वसंयोगनाशा
वच्छिंन्नोत्तरसंयोगप्रागभावो वेति स्वजंन्यविभागजंन्यपूर्वसंयोगनाशावच्छिंन्नस्वजंन्योत्तरसंयोगप्रागभाव इत्यर्थः नातिप्रसंगः क्वचित्तु स्तूके पूर्वसं
योगनाशावच्छिंन्नविभागो वेति पाठः स च प्रामादिकः प्रथमद्वितीयचतुर्थक्षणे प्येकैकोपाधेरेवाभिहितत्वात् तृतीयक्षणे उपाधिद्वयाभिधाने संदर्भविरोधापत्तेः

उत्तरसंयोगावच्छिंन्नं कर्म वा नचोत्तरसंयोगानंतरं क्षणव्यवहारो न स्यादिति वाच्यम् कर्मांतरस्यापि सत्वादिति ॥ ॥ ॥ ॥ ॥ ॥ -

उत्तरसंयोगस्यैव विभागनाशकतायाः सिध्धांतसिध्धतया निरुक्तोपाधेः क्षणद्वयावस्थायिनः क्षणत्वायोगाच्च यदि च तत्पाठप्रामाण्ये आग्रहस्तदा पूर्व
संयोगनाशस्यैव विभागनाशकत्वाभिप्रायेण संयोजनीयः चतुर्थक्षणे तमाह उत्तरसंयोगेति स्वनाशकोत्तरसंयोग इत्यर्थः तेन सर्वस्यैव संयोगस्योत्तरसंयोग

तयानद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिर्निरस्ताः नन्वेतादृशक्षणलक्षणं महाप्रळयात्मकक्षणे अव्याप्तं तत्र तादृश कर्माभावात् नचमहाप्रळयस्य क्षणत्वाभावइष्टएवेतिवाच्यम् तत्रापिक्षणव्यवहारस्यसत्वात् अन्यथामहाप्रळयोत्पत्तौउत्पत्तिलक्षणस्य तदधिकरणक्षणावृत्तित्वघटितस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वरूपस्याव्याप्त्यापत्तेः तत्रमहाप्रळयाधिकरणक्षणाप्रसि

महाप्रळये क्षणादिव्यवहारोयद्यस्ति तदा ध्वंसैनै॰वोपपादनीयइति ' दिनादिव्यवहारस्तुतत्तत्क्षणकूटै

रिति दूरांतिकादिधीहेतुरेकानित्यादिगुच्यते उपाधिभेदादेकापिप्राच्यादिव्यपदेशभाक् दूरत्वमंतिक

त्वंचदैशिकंपरत्वंअपरत्वंबोध्यम् तद्बुधेरसाधारणंबीजंदिगेव ॥७॥ ७॥ ७॥ ७॥ ७॥

क्षेरतआह महाप्रळयइति महाप्रळयेक्षणव्यवहारोनास्त्येव उत्पत्तिक्षणस्य क्षणाघटितस्यैवस्ववृत्ति ध्वंसप्रतियोगिकालावृत्तित्वविशिष्टस्ववृत्तित्वरूपस्य तदुत्पत्तौसंभवादित्यभिप्रेत्योक्तम् यदीति ध्वंसैनैवेति स्ववृत्तिध्वंसप्रतियोगि प्रतियोगिकयावध्वंसविशिष्टसमयस्यै

वतत्र क्षणव्यवहारविषयत्वादितिभावः इतिकालग्रंथः बीजंप्रयोजकम् ७ ॥७॥श्रीराधाकृष्ण

कथंदिशस्तत्र प्रयोजकत्वंदर्शयति दैशिकपरत्वापरत्वयोरिति परत्वापरत्वबुध्धिंप्रति परत्वापरत्वेनिमित्ते तत्रदिक्पिंडसंयोगस्तत्रदिगितिक्रमेण परंपरयादिशस्तद्बुध्धौनिमित्तत्वंबोध्यम् अत्रापिबुध्धिपर्यंतानुधावनंदैशिकपरत्वापरत्वयोः प्रमाणंदर्शयितुं तादृशपरत्वापरत्वाभ्यामेवतदनुमितेः संभवादिति प्रतीच्यादीत्यादिनोऽदीच्यादिपरिग्रहः उपाधीति वस्तुतो दिशएकत्वेपितत्तदुपाधिभेदेन प्राच्यादिसंज्ञाभेदइतिभावः प्राच्यादिसंज्ञासुनिमित्तभूतानुपाधीनाह यत्पुरुषस्येति पुरुषस्येतिपदार्थमात्रोपलक्षणम् पंचम्यर्थेषष्ठी दिक्मूर्त्त एवमग्रेपि तथाचयदपेक्षयोदयगि

दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेकादिक् सिध्यतीतिभावः ननुयद्येकैवदिक् तदाप्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतेइत्यत आह उपाधिभेदादिति यदायत्पुरुषस्योदयगिरिसंनिहितायादिक् सातत्पुरुषस्यप्राची एवमुदयगिरिव्यवहितायादिक् साप्रतीची एवंयत्पुरुषस्यसुमेरुसंन्निहितायादिक् सोदीची ॥ ॥ ॥ ॥ ॥ ४

रिसंनिहितं यन्मूर्त्तंसाततः प्राचीत्यर्थः तदपेक्षयोदयगिरि संनिहितत्वंचतन्निष्ठोदयगिरिसंयुक्तसंयुक्तापेक्षयाऽल्पतरोदयगिरिसंयुक्तसंयोगवत्वम् ॥
इत्थंचमधुरायाः प्राच्यः प्रयागइत्यत्र मधुरानिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्यापेक्षयाल्पसंख्यापर्याप्त्यधिकरणोदयगिरिसंयोगवन्मूर्तवृत्तिप्रयागइत्य

९

एवं काशीतः प्रतीच्यां प्रयाग इत्यत्र काशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्यापकसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त
वृत्तिः प्रयागः एवमन्यत्रापि ऊहनीयाः तन्निष्ठोदयाचलसंयुक्तसंयोगपरंपराघटकं यन्मूर्तं तत्प्राचीत्यपि वदंति दीधितिकृतस्तु दिक्कालौ नेश्वरा
दतिरिच्येते मानाभावात् तत्र कालोपाधिगुणादिविशिष्टादीश्वरादेव क्षणदिनप्राचीप्रतीचीत्यादिव्यवहारोपपत्तेरित्याहुः अत्र नव्याः ईश्वरस्य

तद्व्यवहिताल्पवाची सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात्

दिक्कालरूपत्वं तत्र जीवस्यैवेति विनिगमनाविरहेणातिरिक्तयोस्तयोः स्वीकारः नचात्र जीवस्य जगज्जनकत्वं परापरत्वजनकत्वं च कल्प्यमी
श्वरस्य क्लृप्तमिति लाघवमिति वाच्यम् संबंधघटकयोर्दिक्कालयोर्जगज्जनकताकल्पनाद्दिक्कालोपाधीनामेव जगज्जनकत्वकल्पनात्प
रत्वापरत्वयोर्गुणत्वे एव मानाभावः नत्विकृष्टत्वविप्रकृष्टत्वाभ्यामेव परापरव्यवहारोपपत्तेरिति वदंति इति दिग्ग्रंथः श्री ॥
सुखदुःखादीति आदिना ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनापरिग्रहः यद्यप्यात्मत्वस्यान्यात्मन्यप्रत्यक्षत्वेऽपि स्वात्मनि स्वरूपतो मा
नसप्रत्यक्षविषयत्वमस्त्येव तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातिरूपत्वं न सिध्यति अनेकसमवेतत्वघटितजातित्वग्र